# संस्कृतवार्ता:

दिनाङ्क : 28/06/2025 सायम् : 06:20

आदौ-मुख्यवार्ता:

- प्रधानमन्त्रिणा नरेन्द्रमोदिना कथितं यत् भारतं विकासं परम्परां च स्वीकृत्य अवश्यं अग्रे गच्छत्विति; राष्ट्रम् औपनिवेशिक-मनोवृत्तिश्च त्यजेदिति च स: अप्रार्थयत्।
- महानदी-कोल्फील्ड्-लिमिटेड् इति संस्थया ओडिशा-राज्ये पञ्चत्रिंशत्मिलीयन टन इति क्षमतायुक्तौ नूतनौ कृष्णाङ्गारागारौ उद्घाटयिष्येते।
- अमेरिका-देशः कनाडा-देशेन सह व्यापारसंवादम् निरस्तं कृत्वा नूतनमूल्यानि च शीघ्रमेव घोषयिष्यति।
- अन्ताराष्ट्रिय-परमाणु-ऊर्जा-संस्था इत्यनेन उक्तं यत् द्वादश-दिवसानां इस्राइल्-ईरान्-युद्धानन्तरं गल्फ्-प्रदेशेषु विकिरणस्य स्तरः सामान्यः एव अस्तीति।
- भारतीय-बैडमिण्टन-क्रीडकौ आयुष्-शेट्टी, तन्वी-शर्मा च यू. एस्. ओपन्-इति बैडमिण्टन्-क्रीडायां पुरुष-महिला-एकलयोः उपान्त्यस्पर्धां प्रविष्टवन्तौ।
- अण्डर्-19 इति क्रिकेट्-क्रीडायां, होव्-नगरे प्रथमायां युव-एकदिवसीय क्रीडायां भारतेन इङ्ग्लेण्ड्-दलम् षड्स्तोभैः पराजितम्।

-------------------------------------------

प्रधानमन्त्री आचार्यः

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत्, राष्ट्रम् विकासं परम्परां च स्वीकृत्य अवश्यं अग्रे गच्छत्विति। नवदेहल्यां आचार्य-विद्यानन्द-जी-महाराजस्य शतवार्षिकोत्सवस्य उद्घाटनं कुर्वन्, प्रधानमन्त्री अवदत् यत् एतस्य संकल्पस्य आधारेण, सर्वकारः देशस्य सांस्कृतिकस्थलानां

तीर्थस्थानानां च विकासं कुर्वन् अस्ति। प्रधानमन्त्री अवदत् यत्, केन्द्रेण प्राकृतभाषायै शास्त्रीयभाषायाः स्थानं प्रदत्तम्। भारतस्य प्राचीन-पाण्डुलिपीनाम् डिजिटलीकरणायै अभियानमपि प्रचलति। सः राष्ट्रम् औपनिवेशिक-चिन्तायाः मुक्तं कर्तुं प्रार्थयत्।

कार्यक्रमोऽयं आचार्य विद्यानन्दजी महाराजस्य शततमे जन्मोत्सवावसरे भगवान् महावीर-अहिंसा-भारती-न्यासेन सह सर्वकारेण आयोजितायाः एकवर्षात्मिकायाः राष्ट्रिय-श्रद्धांजल्याः औपचारिकारम्भस्य निदर्शनम् आसीत्।

---------------------------------------------

अङ्गारखनिजानि -

कोल्-इण्डिया इत्यस्य सहायकसंस्था महानदी-कोल्फील्ड्-लिमिटेड् इत्येषा संस्था ओडिशा-राज्ये पञ्चत्रिंशत्-मिलीयन- टन् इति संयुक्तक्षमतायुक्तयोः नूतनयोः अङ्गारागारयोः उद्घाटनार्थं सज्जिता अस्ति। सुभद्रा-आगारः, बलभद्र-आगारश्च, राज्यस्य अङ्गुल्-मण्डलस्य ताल्चेर्-अङ्गारक्षेत्रेषु स्थापिताः भविष्यन्तीति अस्माकं संवाददात्रा संसूचितम्। एम्. सि. एल्. इत्यस्य मतेन सुभद्रा-आगारे अस्य वित्तीयसत्रस्य अन्तपर्यन्तं प्रतिवर्षं पञ्चविंशतिमिलीयन टन् इति कृष्णाङ्गारस्य उत्पादनं भविष्यति इति निर्धारितमस्ति।

---------------------------------------------

अमेरिकी कनाडा व्यापारवार्ता:

अमेरिकीयराष्ट्रपतिः डोनाल्ड ट्रम्पः कनाडादेशेन सह व्यापारवार्तालापस्य समाप्तेः घोषणाम् अकरोत्, तस्य कनाडादेशेन सह नूतनशुल्कपरिमापः शीघ्रमेव घोषयिष्यते इति उक्तवान्। सोमवासरतः एषः करः प्रभावी भविष्यति।

---------------------------------------------

IAEA-IRAN न्यूक्लियर्ः

अन्ताराष्ट्रिय-परमाणु-ऊर्जा-संस्थायाः महानिदेशकः राफेल् मारियानो ग्रोसी इत्येषः अवदत् यत् इस्राइल्-ईरान्-देशयोः मध्ये द्वादश-दिवसानां द्वन्द्वानन्तरं गल्फ्-क्षेत्रे विकिरणस्य स्तरः सामान्यः

एव अस्ति, परम् ईरान्-देशस्य अनेकेषां परमाणु-स्थलानां महती क्षतिः अभवत्। श्रीग्रोसी इत्ययं अन्ताराष्ट्रिय-विकिरण-निरीक्षण-व्यवस्थायाः माध्यमेन नियमितरूपेण आई. ए. ई. ए. इत्यस्मै प्रतिवेदयन् क्षेत्रीय-दत्तांशम् उद्धृत्य उक्तवान् यत् एतत् अष्टचत्वारिंशद्राष्ट्र-समूहः कथमपि परमाणु-ऊर्जा-रियेक्टर् इत्यतः महत्त्वपूर्णं रेडियो-आक्टिव् इत्यस्य निर्गमनं ज्ञातुं शक्नोतीति।

---

वीपी-प्रस्तावना

उपराष्ट्रपतिः जगदीपधनखड़: अद्य उक्तवान् यत् संविधानस्य प्रस्तावना एव तस्य आत्मा भवति, सा परिवर्तनशीला न भवतीति।

नवदिल्ल्यां पुस्तकविमोचनकार्यक्रमं सम्बोधयन् श्रीधनखड़: अवदत् यत् आपत्काले जनाः प्रायः दासत्वं प्राप्नुवन्ति स्म तस्मिन् समये प्रस्तावनापि परिवर्तितेति।

---

MEA-सिन्धु-जलम्

भारतस्य केन्द्रशासितप्रदेशे जम्मू-कश्मीर्-प्रदेशे स्थितायाः किशनगङ्गा-रत्ले-जलविद्युत्-परियोजनायाः विषये तथाकथित-मध्यस्थ-न्यायालयेन प्रदत्तः निर्णयः भारतदेश: निराकृतवानिति। एकस्मिन् वक्तव्ये, विदेशमन्त्रालयः अवदत् यत्, भारतम् अस्य मध्यस्थता-न्यायालयस्य विधिमान्यतां कदापि न अङ्गीकृतवदिति, तस्य संविधानम् सिन्धु-जल-सन्धेः गम्भीरम् उल्लङ्घनं इति अमन्यत्। पहलगाम्-आततायिनः आक्रमणानन्तरं देशेन सिन्धु-जल-सन्धिः स्थगितास्ति।

---

भारतस्य नवजातमृत्यु-परिमापः

यत्र पञ्चवर्षेभ्यः न्यूनवयस्कानां मृत्योः वैश्विक-स्तरे एकषष्टीप्रतिशतमस्ति तत्रैव भारते अष्टसप्ततिः प्रतिशतं यावत् न्यूनीभूतास्ति। केन्द्रीय-स्वास्थ्य-मन्त्रालयः अवदत् यत्, मसूरणा-

व्याप्तिं वर्धयितुं निरन्तरं ध्यानं दत्त्वा, भारतेन अल्पसेवायुक्तजनसङ्ख्यां प्राप्तुं सक्रियं समावेशीयं च समीकरणं स्वीकृतम् अस्ति। मन्त्रालयः अवदत् यत्, व्याक्क्सिनेषन् इति अत्यन्तं शक्तियुतं, मितव्ययी च सार्वजनिक-स्वास्थ्य-उपायेषु अन्यतमम् अस्ति।

---------------------------------------------

ईरानराष्ट्रस्य वित्तम्

ईरान्-देशेन अद्य इस्लामिक्-रिवोल्यूषनरी-गार्ड्-कार्प्स् इत्यस्य सेनापतीनां, सैनिकानां, परमाणु-वैज्ञानिकानां, इस्राइल्-देशेन सह द्वादश-दिवसीय युद्धे मृतानां नागरिकाणां च राजकीय-अन्त्येष्टिक्रिया-समारोहः आयोजितः। युद्धकाले मृतानां षष्टी इरानी-जनानाम् अन्त्येष्टिक्रियायां भागं ग्रहीतुं राजधानी तेहरान्-नगरस्य आज़ादीति वीथ्यां सहस्रशः शोकसंलिप्ताः जनाः समागताः। इस्राइल-देशस्य रक्षासेनाया: आक्रमणेन ईरान्-देशस्य आई. आर्. जी. सी. इत्यस्य प्रमुखः हुसैन् सलामी, एकः एरोस्पेस्-फ़ोर्स्-सेनापतिः, एकः शीर्षसेनापतिः, अन्ये भटाश्च वीरगतिं प्राप्तवन्तः।

---------------------------------------------

गुजरात अमित शाह:

गुजरातस्य पंचमहल मण्डलान्तर्गतं गोधरायां स्थिते श्रीगोविन्द-गुरु विश्वविद्यालये अद्य केन्द्रीयगृहसहकारिता-मन्त्री अमितशाहेन विभिन्नानां विकासात्मक-परियोजनानाम् आभासीय-माध्यमेन उद्घाटनं शिलान्यासं च विहितम्। सः नवनिर्मितस्य सेंटर ऑफ एक्सीलेंस इति भवनस्य उद्घाटनमपि कृतवान् ।

---------------------------------------------

पाकिस्तानसैन्यस्योपरि आक्रमणम्

अद्य वायव्यपाकिस्तान्-प्रदेशे आत्मघाती-आक्रमणे न्यूनातिन्यूनं षोडश पाकिस्तानी-सैनिकाः मृताः, एकोनत्रिंशत् जनाः अपि व्रणिताः, तेषु दश-सैनिकाः, नवदश-नागरिकाश्च आसन्।

पाकिस्तानस्य तालिबान् इत्यनेन सह सम्बद्धस्य हफीज् गुल् बहादुर् इत्यस्य सशस्त्रसमूहस्य आत्मघाती-बमवर्षक-इति विभागेन आक्रमणं स्वीकृतम्।

---------------------------------------------

## IMD- WEATHER:

ऋतुविभागेन आगामिषु षड्दिवसेषु उत्तरपश्चिम, मध्य, पूर्व, पूर्वोत्तरभारतस्य च केषुचित् भागेषु अतिवृष्टेः पूर्वानुमानं कृतमस्ति। दक्षिणप्रायद्वीपीयभारते अद्य तमिलनाडुराज्ये तटीयकर्नाटक-केरलयोः च प्रचण्डवृष्टिः भविष्यति। अस्माकं केरल संवाददात्रा ख्यापितं यत् ऋतुविभागेन अद्य राज्यस्य षट्मण्डलेषु ऑरेन्ज-अलर्ट् इति सञ्चेतना प्रसारिता।

---------------------------------------------

## बैडमिन्टन् यू एस् ओपन

अस्य वर्षस्ययू. एस्. ओपन् बैडमिण्टन्-क्रीडायां, अद्य प्रातःयू. एस्. ए.-देशस्य आयोवा-नगरस्य कौन्सिल् ब्लफ्स्-नगरस्य मिड्-अमेरिका-सेण्टरेति मध्ये भारतीय-युवक्रीडकौ आयुष्-शेट्टी, तन्वी-शर्मा च प्रबलप्रदर्शनेन सेमीफ़ैनल्-स्पर्धां प्राप्तवन्तौ।

---------------------------------------------

## क्रिकेट यू-19 भारत vs इङ्ग्लेण्डः

अण्डर्-19 इति क्रिकेट्-क्रीडायां, ह्यः होव्-नगरस्य कौण्टि-क्रीडाङ्गणे प्रथमायां युव-एकदिवसीय क्रीडायां भारतेन इङ्ग्लेण्ड्-देशः षड्स्तोभैः पराजित:। प्रथमं ब्याटिङ्ग् इति कर्तुं निश्चितं कृत्वा आतिथेय-इङ्ग्लेण्ड्देशः केवलं चतुर्सप्तत्यधिकैकशतमेव धावनाङ्काः रचितवान्।

।। इति वार्ता: ।।